157312



東京外国語大学
157345
47.3.31
図書館蔵書

# सार्थपुष्पाञ्जली

संस्कृत व्याख्या और भाषाटीकासहित

जिसमें

श्रीमज्जगज्जननी श्रीभुवनेश्वरी देवीजीका
चरित्र वर्णन है ॥

जिसको

श्रीपतिजीके पुत्र रामकृष्णकविने अत्यन्तललित
श्लोकों में रचना किया था ॥

उसीका

डाक्टर छेदीलाल मेडिकलअफ़िसरमइहरने
प्रत्यक्षरका भाषामें टीका रचना किया ॥

दूसरीबार

लखनऊ

मुंशी नवलकिशोर ( सी, आई, ई ) के छापेख़ाने में छपी
नवम्बर सन् १९०१ ई०

134

हक़तसनीफ़महफ़ूज़ है बहक़ इस छापेख़ाने के ॥

# सार्थपुष्पाञ्जली की भूमिका

अहा ! ज्योंहीं मैंने इस अपूर्वनिधि वेद शास्त्रों का सार भुक्ति मुक्ति की दाता सर्व कल्याणकारक भक्तजनों की अत्यन्तही प्रिय अति ललितश्लोकों से भूषित भुवनेश्वरी के चरित को देखा रहा न गया फटहीपडा अर्थात् बुद्ध्यनुसार टीका करनेको उद्यत हुआ आशा तो न थी परन्तु भगवतीने प्रेरणा करही दिया न तो किसको ताब थी कि इस अगस्य समुद्र में पांयदेता अधिक क्या कहों ॥

दोहा

अधिक कथन बिनु प्रेमकी मोहिं नहिं अधिक सोहात ।
अधिक प्रेम प्रेमी लहैं अधिक अधिक अधिकात ॥

श्लोक

गोरक्षपुरउर्द्रमध्य मिथिलाअयोध्या ।
प्रेमस्कृतव्याख्या सूनुनाशम्भुकाशी ॥

अर्थ

प्रेमचन्द उपनाम छेदीलाल मोहल्ला उरदू शहर गोरखपुर लाला कोशीराम के पौत्र शिवचरणलाल के पुत्रने टीका की ॥

इसके मुद्रितादिका सर्व अधिकार मैंने महाशय मुन्शीनवलकिशोरजीको दे दिया ॥

दः डाक्टर छेदीलाल मइहर.

---

श्रीगणेशाय नमः ॥

# सार्थपुष्पाञ्जली ॥

भगवतीभगवत्पदपंकजं भ्रमरभूतसुरासुरसेवितम् । सुजनमानसहंसपरिष्कृतं कमलयाऽमलया निभृतम्भजे १ ॥

भगवतीति । भगवती भगवत्पदपंकजं भजे भगवतीभगवतोः पार्वतीशिवयोः पदपंकजं चरणारविन्दं अहंभजे भजामि । भगं षडैश्वर्य्यं विद्यते यस्यां सा भगवती । षडैश्वर्य्यं बीजरहस्ये । ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसःश्रियः । ज्ञानवैराग्य योश्चापि षण्णां भगइतिस्मृतः १ भगंषट्पदार्थं वेत्तीतिभगवान् । तदुक्तंविष्णुपुराणेश्लोक १ । उत्पत्तिंप्रलयंचैवभूतानामगतिंगतिम् । वेत्तिविद्यामविद्यांवा सवाच्योभगवानितीति । कीदृशंपदपंकजं भ्रमरभूतसुरासुरसेवितं । भ्रमरभूताः भृंगतुल्याः इन्द्रादयो देवाः असुराः बाणादयो दैत्याः तैः सेवितं सभाजितं । भ्राम्यति पुष्पेष्वितिभ्रमरः । भ्रमुसंचलने । पुनःकीदृशं पदपंकजं । सुजनमानसहंसपरिष्कृतं सुजनानां सज्जनानां मानसानि चित्तानि हंसाः राजहंसाः तैः परिष्कृतं भूषितं । चक्रांगःसारसोहंसः इतियादवः । स्वांतं हृन्मानसंमन इत्यमरः । पुनःकीदृशंपदपंकजं । कमलयामलयानिभृतं । अमलया निर्मलया कमलया शोभया निभृतंपूर्णं । कंप्रकाशं मलते दधाति या सा कमला । मलधारणे इति १ ॥

पार्वती औ महादेव के कमलरूपी चरणों जिनमें सुरासुर अर्थात् इन्द्रादि देवता औ बाणादि निशिचर भवँर के समान लुब्ध औ सेवते हैं और जो सन्त जनके मानसरोवररूपी निर्मलचित्त में हंसरूपी परिपूर्ण शोभित हैं तिन चरणों को मैं भजताहूं १ ॥

**ताउभावपिवन्देहं विघ्नेशंकुलदैवतम् । नरनागाननस्त्वेको नरसिंहोनरोऽपरः २ ॥**

तावुभाविति । विघ्नेशं गणेशं कुलदैवतं कुलेष्टदेवं श्रीनृसिंहं एतौउभौद्वौ वन्दे अहंनमःकरोमि । हेरम्बोगणविघ्नेश इतिहेमचन्द्रः । अपीति निश्चये । तत्रएकः विघ्नेशः नरनागाननः नरः सन् नागाननो गजमुखः इत्यर्थः । नागःसर्प्पेमतंगजे इतिवैजयन्ती । अपरःअन्यःकुलदैवतःनरसिंहःनरःसन्सिंहःसिंहमुखःइत्यर्थः । कीदृशः अपरः नरः सनातनपरमात्मा । तथाचस्मृतिः । नरतीतिनरःप्रोक्तः परमात्मा सनातन इति २ ॥

तौने दोनोंको निश्चयसे मैं बन्दन करताहूं नर शरीर गजमुख श्रीगणेश और कुल देवतान औ नृसिंह परमात्माको २ ॥

**हरिगुरुपदपद्मेहृद्यपद्मेऽनुरागादधिगतपरभागो सन्निधायादरेण । तदनुचरिकरोमि प्रीतयेभक्तिभाजां भगवतिपदपद्मे पद्यपुष्पाञ्जलिंते ३ ॥**

हेभगवति हे दुर्गे तदनु वन्दनानन्तरं भक्तिभाजां भक्तजनानां प्रीतये अनुरागाय ते तव पदपद्मे चरणारविन्दे पद्यपुष्पाञ्जलिं पद्यतिपदवृन्दान्येव पुष्पाणि कुसुमानि तेषां पद्यपुष्पाणांअञ्जलिं करसम्पुटं चरिकरोमि अतिशयेनकरोमि ददामीत्यर्थः अहमित्यध्याहारः । भगंवीर्यादिषडैश्वर्यं विद्यते यस्यां सा भगवती । भगंवीर्य्यप्रयत्नेच्छारूपमाहात्म्यमुक्तिषु इतिहेमचन्द्रः । किंकृत्य आदरेणप्रीत्या हृद्यपद्मे स्वकीयहृदयकमले हरेर्नारायणस्यगुरोर्मन्त्रोपदेशकस्य पदपद्मे चरणारविन्दद्वये सन्निधाय सम्यक्स्थापित्वा । हृदिभवं हृद्यं । कीदृशो हृदयपद्मे अनुरागादधिगतपरभागो । अनुरागात् प्रेमप्रसंगात् अधिगतः प्राप्तः परभागो गुणोत्कर्षः यस्मिन् तत्तस्मिन्नधिगतपरभागा परभागो गुणोत्कर्षःइत्यमरः । अनुरंजायते जनानित्यऽनुरागः । रंजरागेति ३ ॥



गुणोत्कर्षयुत हरि औ गुरुचरण कमल अपने हृदय कमल में धारण करके भक्तिके भजनेवाले अर्थात् भक्तों के निमित्त भगवती के चरणों में पद्य अर्थात् काव्य पुष्पाञ्जली कहताहूं ३ ॥

**केनैतेरचिताःकुतोननिहताः शुम्भादयोदुर्मदाः केनैतेवतपालिताइतिहितत्प्रश्नेकिमाचक्ष्महे । ब्रह्माद्यापिचशंकिताः स्वविषये यस्याः प्रसादावधिप्रीतासामहिषासुरप्रमथिनीभिद्यादवद्यानिमे ४ ॥**

केनैतेति । सा महिषासुरप्रमथिनी भगवती प्रीता प्रसन्ना सतीमेमम अवद्यानि कलंकानि भिद्यात्विदारयेत् इत्यन्वयः । भिदिर्विदारणे । महृतेपूज्यते बलिदानार्थं यः सः महिषस्तद्रूपोऽसुरःमाहिषासुरः । तदुक्तं । माहिषेण स्वरूपेण त्रासयामास तान् गणानितिदुर्गे । महिषासुरं प्रमथितुं व्यालोडितुं शीलमस्या इति महिषासुरप्रमाथिनी । मथितं निर्जलेघोले व्यालोडित निस्पृहयोरिति हेमचन्द्रः । कलंका अवद्यामाले किंजल्कं लक्ष्मलक्षणाभितिधनंजयः । साकायस्याः भगवत्याः प्रसादावधि प्रसन्नतापर्य्यंतं ब्रह्माद्याः ब्रह्म विष्णुरुद्राःअपिनिश्चये स्वविषये स्वस्वस्थाने शंकिताः चकिताः सन्ति प्रसादस्तु प्रसन्नता इत्यमरः । विषयो जनपदेस्थाने इति वैजयन्ती । कुतः हि यतः इतिप्रश्ने ततूज्ञातुमिच्छायां वयंब्रह्माद्याः किंउत्तरं आचक्ष्महे कथयामः । हि हेताववधारणेतिविश्वः । इतीतिकिं । दुर्मदाःदुष्टाः एतेशुम्भादयो दैत्याः केनरचिताः उत्पादिताः । नुइतिवितर्के कुतः केननिहताः, नाशिताः । वतइति विस्मयेकेन पालिताः रक्षिताः । कुतइत्यत्रसर्वविभक्तिकस्तस्प्रत्ययः । वयंतुएषामुत्पादनेपालनेनाशनेऽसमर्थाः । वातामन्त्रणसन्तोषखेदानुक्रोशविस्मयेतिविश्वः । दुर्दुष्टोमदोऽहंकारोयेषांतेदुर्मदाः । मदोरेतस्यहंकारेति हेमचन्द्रः इति ४ ॥

हा ! किसने शुम्भादि दैत्यों को बनाया औ किसने इनको पालन किया औ क्यों मारे गये ठीक इस प्रश्न का उत्तर मैं क्या कहसक्ता हूं जब कि

ब्रह्मादि देवता अपने २ अधिकारमें शंकित हैं और जिसकी प्रसन्नताही जिनकी
अवधि वही भगवती महिषासुरप्रमथिनी उसी भांति मेरे हृदय के अज्ञान को
वेधन करै ४ ॥

**पातुंश्रीस्तुचतुर्भुजाकिमुचतुर्बाहुंमहौजान्भुजान्**
**धत्तेष्टादशधाहिकारणगुणाः कार्य्येगुणारम्भकाः ।**
**सत्यंदिक्पतिदंतिसारभुजभृच्छंभुः स्वयंभूः स्वभू**
**र्धर्मैक्यप्रतिपत्तयेकिमथवापातुंदशाष्टौदिशः ५ ॥**

पातुमिति । चतुर्भुजा भुजचतुर्थयुक्ताश्रीःलक्ष्मीरूपा भगवतीति
पादपूर्णौ किमु सम्भावनायां महानोजः पराक्रमोयेषुतेतान्महौजा
न् अष्टादशधा अष्टादशप्रकारकान् भुजान् बाहून्धत्ते धारयति
इत्यन्वयः तदुक्तं तत् ध्याने । अष्टादशभुजांदेवीमिति किमुसम्भा
वनायांस्याद्विमर्शेपिकिमुस्मृतिमितिविश्वः । श्रयतिसेवतोरुद्र
मितिश्रीः । तदुक्तंदुर्गापाठे ब्रह्मस्तुतौ । त्वंश्रीस्त्वमीश्वरी त्वंह्री
स्त्वंबुद्धिर्बोधलक्षणा इति । चत्वारोभुजावाहवो यस्या असौच
तुर्भुजा । तदुक्तंदेवीरहस्ये । कमलांकुशपाशाद्यैरलंकृतचतुर्भुजा
इन्दिराकमला लक्ष्मीः सास्त्री रुक्मांगदाम्बुजा । इति । अष्टाद
शधाइत्यत्रसंख्यायाः प्रकारे धा इतिसूत्रेण धाप्रत्ययः । किंकर्तुं ।
चतुर्बाहोः को अर्थः चतुर्बाहुं विष्णुंपातुं मधुकैटभभयाद्रक्षितुमि
त्यर्थः । कर्मणिषष्ठी तदुक्तं दुर्गापाठे । तावप्यतिबलोन्मत्तौ महा
मायाविमोहितौ ।उक्तवन्तौवरोस्मत्तोव्रियतामितिकेशवमिति।हि
यतःकारणगुणाःहेतुभूताःयेगुणाःसत्त्वादयस्तेकार्य्येप्रयोजनेगुणा
रम्भकाः सृष्ट्यादिगुणोत्पादकाःसंति । अतएवभगवतीकार्य्ये का
र्य्येतत्तद्गुणावती बोध्या।तदुक्तंदुर्गापाठे । त्वंसृष्टौसृष्टिरूपात्वं स्थि
तिरूपाचपालने ।तथासंहृतिरूपांते जगतोस्यजगन्मये।इति। अ
ष्टादशभुजधारणेदृष्टान्तमाह । धर्मैक्यप्रतिपत्तयेधर्म्मैक्यस्यकोर्थः
एकीभूतस्यधर्मस्य आचारस्यप्रतिपत्तयेप्रवृत्तये अथवापक्षान्तरेकि
वितर्के दशचाष्टौदिशः पातुंरक्षितुं सत्यं यथार्थं यथास्यात्तथाशम्भु



शिवः अष्टौभुजान्धत्ते । तदुक्तंरुद्रयामले । कपालशूलडमरूपरशुख
ट्वांगरंकवः । वराभयेदधानोऽष्टमूर्त्तिःपूज्यःसुरासुरैरिति । स्वयं
भूर्ब्रह्माद्वौभुजौधत्ते । तदुक्तं ध्याने । ध्येयःपद्मासनेब्रह्मा साक्षसूत्र
कमण्डलुरिति । स्वभूर्विष्णुः अष्टौभुजान्धत्ते । तदुक्तंभागवते ना
रायणवर्माणि । हरिर्विदध्यान्ममसर्वरक्षांयस्यांघ्रिपद्मःपतगेन्द्रपृष्ठे।
दरारिचर्मेऽसिगदेशपापपाशान्दधानोऽष्टगुणोऽष्टबाहुरिति । प्रति
पत्तिः पदप्राप्तौप्रवृत्तौगौरवेपिचेतिविश्वः कीदृशःशम्भुः स्वयम्भूः
स्वभूः दिक्पतिदन्तिसारभुजभृत् । दिक्पतिरिन्द्रःतस्यदन्तीऐरा
वतःतस्यसारंशुण्डादण्डबलंभुजेषुविभक्तिधारयतितादृशः इति५

देवी चतुर्भुज विष्णुजीकी रक्षाकरनेको बड़े पराक्रमवाले चारभुजा धारण
करती है और इन्द्र के हाथी के समान पराक्रमवाले भुजा धारण करनेहारे
महादेव ब्रह्मा और विष्णुजी दश वा आठ दिशाओंकी रक्षाकरनेको मिलकर
अठारह भुजा धारण करते हैं क्योंकि यह बात सत्यहै कि कारण गुण कार्य
गुणके प्रारम्भ करनेवाले होते हैं ५ ॥

**प्रीत्याष्टादशसम्मितेषुयुगपद्देवेषुदातुंवरांस्त्रातुं**
**वाभयतोबिभर्षिभगवत्यष्टादशैतान्भुजान् । यद्व**
**ष्टादशधाभुजांस्तुविभृतः कालीसरस्वत्युभे लीला**
**त्वैक्यमिहानयोःप्रथयितुंसात्वंरमेरक्षताम् ६ ॥**

प्रीत्याइति हेभगवति हेदुर्गे प्रीत्या प्रेम्णायुगपदेकंजकालैव अष्टा
दशसंमितेषु अष्टाभिरधिकादश इत्यष्टादशलतासम्मितेषु संख्या
केषु देवेषु इन्द्रादिसुरेषु वरानभीष्टान्दातुं वितरीतुं वा यद्वाभयतः
दैत्यजनभयात् त्रातुं रक्षितुं सतानऽष्टादशभुजान् वाहनत्वंबिभर्षि
धारयसि । इत्यन्वयः भुजधारणपोषणयोः । तदुक्तंदुर्गापाठे । वर
दाहंसुरगणान्वरंयंमनसेच्छथ । तंवृणुध्वंप्रयच्छामि जगतामुपका
रकमिति । इत्थंयदायदाबाधा दानवोत्थाभविष्यति । तदातदावती
र्य्याहंकरिष्याम्यरिसंक्षयमिति यतोदेवाःबहवः अतः पुनः दातुं
पुनःपुनः त्रातुमितिबोध्यं । सर्वत्रपूज्यायासाभगवती भगवान्पूज्ये

जिनेपिचेतिधारिणी । एककालेपियुगपदितिवैजयन्ती । हेरमेहेदुर्गे
सांत्वमांरक्षपालय रमतेमहेश्वरोयस्यां सारमा रमक्रीडादौ ।साका
यरमाअनयोः द्वयोः कालीसरस्वत्योःलीलातस्यविलासस्यऐक्यं
एकत्वं प्रथयितुं प्रकटीकर्तुं इहलोकेवरीवर्ति स्वकीयांशजातत्वात्
तदुक्तंवैकृतिरहस्ये । गौरीदेहात्समुद्भूतायासत्त्वैकगुणाश्रयासाक्षा
त्सरस्वतीप्रोक्ताशुम्भासुरनिवर्हणीति।कालयतिवर्द्धयतिभक्तसुख
मिति काली । अनयोःकयोः। येउभेद्देइमे कालीसरस्वत्यौ अष्टादश
भुजान् बिभृतःधारयतः यदितु इत्यव्ययं वाक्यालंकारे इति ६ ॥

प्रसन्नतासे अठारहों द्वीपों के भक्तोंको एकही कालमें रक्षाकरनेको औ
वरदान देनेको हे भगवती १८ भुजा तू धारण करती है तौन १८ भुजा औ
लीलाको प्रकट करनेको दोनों सरस्वती औ काली धारण किये हैं तौन रमा
मेरी रक्षा करो ६ ॥

**अयिगिरिनन्दिनिनन्दितमेदिनिविश्वविनोदि
निनन्दनुते गिरिवरविन्ध्यशिरोधिनिवासिनिवि
ष्णुविलासिनिजिष्णुनुते । भगवतिहेशितकण्ठकु
टुम्बिनिभूरिकुटुम्बिनिभूतकृते जयजयहेमहिषा
सुरमर्दिनिरम्यकपर्दिनिशैलसुते ७ ॥**

अथस्तोत्रमाह । अयीति । अयिकोमलालापे । हे महिषासुरम
र्दिनि । हेरम्बकपर्दिनि । हेशैलसुते । त्वंजयजय कोऽर्थःसर्वोत्कर्षेण
वर्त्तस्व वर्त्तस्व इत्यन्वयः जय जय इत्यत्र आदरेवीप्सायांद्विः को
मलामन्त्रणेप्ययिइति वैजयन्ती । महिषासुरस्य महिषरूपधारि
णोदैत्यस्य मर्दिनी विनाशिनीति महिषासुरमर्दिनी तत्सम्बुद्धिः।
तदुक्तंदुर्गापाठे । अर्द्धनिष्क्रांतएवासौयुद्ध्यमानो महासुरः । तया
महासिनादेव्या शिरः छित्त्वानिपातित इति रम्योरमणीयः कप
र्दोजटाजूटो यस्यासा रम्यकपर्दिनी तथा । कपर्दोऽस्यजटाजूटे
इत्यमरः । शिलानां प्रस्तराणांचयो यस्मिन्सःशैलः । शैलस्य हि
मालयस्य सुताकन्येति शैलसुता तथा अन्यसम्बोधोनंदिशिनाशि



गिरीन्पूज्यान् ब्रह्मादीन् नन्दयितुं हर्षयितुंशीलं यस्याःसागिरिन
न्दिनी तथा । नंदिहर्षोगिरिःपूज्ये महीभृतीति वैजयन्ती। नन्दिता
मोदिता मेदिनी पृथ्वीययासा । नन्दितमेदिनी तथा। मधुमेदसा
कृतायासामेदिनी । तदुक्तं हरिवंशे । मधुकैटभयोः कृत्स्नमेदसा
परिसम्प्लुता तेनेयं मेदिनीदेवी प्रोच्यते ब्रह्मवादिभिरिति ॥
विश्वान् त्रयोदशविश्वेदेवान् श्राद्धविषये नोदयति प्रेरयतियासा
विश्वविनोदिनी तथानुदप्रेरणे । विश्वं समस्तजगतार्विश् वेदेवे
षु नागरेति विश्वः । नन्दिता हरप्रतिहारेण द्वाःस्थेननतेनमस्कृ
ते । गणप्रहृत्वेशब्देच । नन्दिरानन्दने धृतप्रतीहारे हरस्यच इति
हेमचन्द्रः । गिरिषुवरः श्रेष्ठो विन्ध्योचलः तस्यशिरोधौ अधि
त्यकायां कोऽर्थःऊर्ध्वभूमौ निवसती । तथा तदुक्तं दुर्गापाठे ।
नन्दगोपगृहेजाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्या
मिविन्ध्याचलनिवासिनी । विन्ध्यात्रुटौलवल्यां विन्ध्योऽयधा
द्रिभेदयोरिति हेमचन्द्रः । विष्णोर्नारायणस्यनेत्रे विलासोयस्याः
सा विष्णुविलासिनी योगनिद्रेत्यर्थः तत्सम्बुद्धौ हे विष्णुविला
सिनि । तदुक्तं दुर्गापाठे। तुष्टावयोगनिद्रांतामेकाग्रहृदयास्थितः। त्रि
बोधनार्थायहरेर्हरिनेत्रकृतालयामिति । जिष्णुरिन्द्रोऽर्जुनोवा ते
नस्तुताकृतस्तुता । नुस्तुतौ जिष्णुर्वासवेऽर्जुने इतिमेदिनी । भ
गवति हे हे भगरूपौकविदन्तेपि हे भवेदिति कारिका भगवती
शब्दार्थः प्रकृतिखण्डे । समृद्धिज्ञानवीर्य्यैच्छा सम्पत्तियशसां
भगः । तेनशक्तिर्भगवती भगरूपाचसासदा । इति शितिक
ण्ठस्य शिवस्य कुटुम्बिनी पत्नीति शितिकण्ठ कुटुम्बिनी तथा
दारःस्यात्तु कुटुम्बिनीत्यमरः । शितिः कृष्णो वा शुक्लः कण्ठो ग
लोयस्य शितिकण्ठः । शितिर्धवलमेचकावित्यमरः । तथाच
श्रुतिः । नमो नीलग्रीवाय शितिकण्ठाय च नमःकपर्दिने इति ।
भूताःदेवयोनिविशेषाः कुटुम्बाः पोष्यवर्गाः सेवकाः यस्याः सा
भूतकुटुम्बिनी । भूतोऽमी देवयोनय इत्यमरः । कुटुम्बं पोष्य
वर्गस्यादित्यमरमाला । भूतानां प्राणिनां कृतमुपकारो यस्स

काशादिति भूतकृता । कृतं पुण्योपकारयोरिति वैजयन्तीति ७॥

हे शैलसुते आनन्दकरनेवाली पृथ्वी औ विश्वको विनोद करनेवाली और जिसकी नन्द स्तुति करते हैं बड़े पहाड़ विन्ध्याचलके शृंगके बसनेवाली विष्णु वल्लभा इन्द्रकरके वन्दित, हे भगवती महादेव की पत्नी परिवारवाली वा धनदा, हे महिषासुरमर्द्दिनि सुन्दर जूटवाली शैलसुता तेरी जयहो जयहो ७॥

**त्रिभुवनपोषिणिशंकरतोषिणि कल्मषमोषिणि घोषरते । सुरवरवर्षिणिदुर्द्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते । दनुजनिरोषिणि दुर्मदरोषिणि दुर्मदशोषिणिसिन्धुसुते । जयजयहेमहिषासुरमर्दिनिरम्य कपर्दिनिशैलसुते ८ ॥**

त्रिभुवनेति । हे शैलसुते त्वं जयजय इति सम्बन्धः । विशेषणंविशिनष्टि । त्रयाणां भुवनानांसमाहारःत्रिभुवनं । त्रिभुवनं त्रैलोक्यं पोषयतीति त्रिभुवनपोषिणी तथा । पुषपुष्टौ । शंकल्याणंकरोतीति शंकरस्तंतोषयतीति शंकरतोषिणी तथा । तुषतुष्टौ । कल्मषमपराधं मुष्णाति चोरयतीति कल्मषमोषिणी तथा । मुषस्तेये । घोषे गोष्ठे कोऽर्थःगवांनिवासेरता सानुरागा या सा घोषरता तथा । घोषस्त्वाभीरपल्लिका इति हैमः । सुराणांदेवानां वरानभीष्टान्वर्षतीति सा सुरवर्षिणी । तथोक्तं दुर्गापाठे । तयास्माकंवरोदत्तोयथापत्सु स्मृताखिलाः । भवतांनाशयिष्यामितत्क्षणात्परमापद इति । दुर्द्धरंतन्नामकदैत्यं धर्षयतिनपराभवनयतीति दुर्द्धर्षिणीतथा । धर्षणेतुपराभाव इत्यमरः । दुर्मुखंतन्नामकदैत्यं मर्षयति नाशयति इति दुर्मुखमर्षिणी तथा । तदुक्तं दुर्गापाठे । दुर्द्धरंदुर्मुखंचोभौ शरैर्निन्येयमक्षयमिति । हर्षेचित्तप्रसन्नतायांरतिः प्रीतिर्यस्याःसाहर्षरतिस्तथा । रुषरिषहिंसायां । तदुक्तंदुर्गापाठे । ततोदेवीत्रिशूलेन गदयाशक्तिवृष्टिभिः । खड्गादिभिश्चशतशो निजघानमहासुरानिति । दुःदुःसहोमदोऽभिमानोयेषांतेदुर्मदाः दुष्टास्तेषुरोषो क्रोधो



यस्याःसा तथा । मदोमर्षेऽभिमानेचेति वैजयन्ती । दुष्टोमदोरेतो वीर्ययेषांतेदुर्मदाःमदोद्धतास्तान् शोषयतीतिदुर्मदशोषिणी।तथा । मदोरेतासिकस्तूर्य्याविितिविश्वः । सिन्धोःक्षीरसागरस्य सुता कन्या या सा सिन्धुसुता तथा महालक्ष्मीरूपा । तदुक्तंतन्त्रे । यासिद्धि लक्ष्मी पराइति ८ ॥

हे त्रिभुवनके पालनेवाली, शंकरको तोषदेनेवाली, कल्मष नाशनेवाली, घोषोंमें प्रीति करनेवाली सुरवर अर्थात् इन्द्रपर कृपादृष्टि दैत्य दुर्धरके तिरस्कार औ दुर्मुखको मारनेवाली दासानन्द दनुज औ दुष्टपररोष औ दुष्ट शोषनेवाली सिन्धुजा महिषासुरमर्दिनी सुन्दर जूटवाली शैलसुता तेरी जयहो जयहो ८ ॥

**अयिजगदम्बकदम्बवनप्रियवासनिवासिनिवासरते । शिखिरिशिरोमणितुंगहिमालयशृंगनिजालयमध्यगते । मधुमधुरेमधुकैटभगंजिनिकैटभगंजिनिरासरते । जयजयहेमहिषासुरमर्दिनि रम्य कपर्दिनिशैलसुते ९ ॥**

अयीति । हे शैलसुते त्वं जय जय इति सम्बन्धः । सम्बोधनं विशिनष्टि । अयीत्यनुनयो अयिप्रश्नेप्यनुनये इतिहेमचन्द्रः। हे जगदम्ब जगतां चतुर्दशलोकानामम्बा मातेति जगदम्बातथा तदुक्तं दुर्गापाठे । त्वमेव सात्वं सावित्री त्वंदेवि जननी परेति । कदम्बानां नीपवृक्षाणांवनंसमूहं प्रियोहृदयंगमोयो वासेवस्थानं तत्र निवसतीति कदम्बवनप्रियवासनिवासिनीतितथा । वास सद्गुन्यवस्थानेति हेमचन्द्रः । कदम्बः सर्षपेनीपे कदम्बं निकुरम्बके इति हेमचन्द्रः । वासे स्वे स्वे मन्दिरे रता साभिलाषा या सा वासरतातथा । वासोगृहसुगन्धयोरिति वैजयन्ती । शिखिरिणां पर्वतानां मध्ये शिरोमणिः श्रेष्ठःयस्तुंगहिमालयः अत्युच्चोहिमगिरिस्तस्य शृंगेशिखरे निजालयं नित्यस्थानं तस्य मध्ये मध्यदेशे गता प्राप्ता तथा । तदुक्तं दुर्गापाठे । ददृशुस्तेततोदेवीमीषद्धासांव्यवस्थिताम् । सिंहस्योपरिशैलेन्द्रे शृंगेमहति कांचनेइति।

निजं नित्ये स्वकीये चेतिहेमचन्द्रः । शिरोमणिः शिरोरत्ने श्रेष्ठे चापि शिरोमणिरिति वैजयन्ती । मधुमद्यं मधुरं प्रियं यस्याःसा मधुमधुरातथा । तदुक्तं दुर्गापाठे । गर्जगर्जक्षणं मूढ मधुयाव त्पिबाम्यहम् । मयात्वयिहतेऽत्रैव गर्जिष्यंत्याशुदेवता इति । मधु क्षीरे जलेमद्ये क्षौद्रेपुष्परसेपिचेति हेमचन्द्रः । मधुरस्तु प्रिये स्वादौ इति हेमचन्द्रः । मधुश्च कैटभश्चतयोर्दैत्ययोर्भंजने नाश नेशीलं यस्याः सा मधुकैटभभंजिनी तथा । भंजो आमर्दने तदु क्तमर्गलास्तोत्रे । मधुकैटभविद्रावि विधातृवरदेनमइति । कै टभभंजिनि विष्णोर्यः रासो रासक्रीडा तत्र रतेकृतानुरागे । तदुक्तं दुर्गापाठे । श्रीःकैटभारिहृदयैककृताधिवासा इति । कैटभा सुरस्यगंजी कैटभगंजिनी । जगंजकैटभंयस्मात्तस्मात्कैटभगंजनः इतिनामददौब्रह्मा वासुदेवस्य चक्रिणः इति विष्णुपुराणे । रासः क्रीडासु गोदुहामिति हेमचन्द्रः ९ ॥

हे जगत्कीमाता सुन्दर कदम्ब वन और सुन्दर स्थान और पहाडोंमें श्रेष्ठ हिमालयके ऊंचे शृंगके अपने भवन में वसनेवाली मधुरे वचनवाली मधुओ कैटभ को मारनेवाली कैटभको गंजनेवाली, विष्णुसे रास करनेवाली महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो ९ ॥

अयिनिजहुंकृतमात्रनिराकृत धूम्रविलोचनधूम्रशते । समरविशोषितशोणितबीजसमुद्भवशोणितबीजलते । शिवशिवशुम्भनिशुम्भमहाहवतर्पितभूतपिशाचपते । जयजयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १० ॥

अयीति । हे शैलसुते त्वं जय जय इति सम्बन्धः । सम्बोधनं विशिनष्टि । अयीतिकोमलामन्त्रणे । निजस्य स्वकीयस्य हुंकृत मात्रेण हुंकारशब्देनैव निराकृतः भस्मीकृतः धूम्रविलोचनस्त न्नामासुर एव धूम्रशतं धूम्रसमूहो ययासातथा । तदुक्तंदुर्गापाठे । इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलोचनः । हुंकारेणैवतंभस्म सा



चकाराम्बिका ततदेति । धूम्रेरक्तश्यामे लोचने यस्यसः धूम्रलो चनःतथा । रक्तश्यामेपुनर्धूम्रधूमलावितिकीर्त्तितौइतिहेमचन्द्रः । समरे संग्रामे विशोषिता विशेषेणनाशिता शोणितबीजात् रक्तबीजात् समुद्भवाः समुत्पन्नाः शोणितबीजाः रक्तबीजाकार पुरुषाः तेषांलता परम्परा ययासातथा । तदुक्तंदुर्गापाठे । याव न्तःपतितास्तस्य शरीराद्रक्तबिन्दवः । तावन्तः पुरुषाजातास्त द्वीर्यबलविक्रमाः । जघानरक्तबीजन्तं चामुण्डापीतशोणितम् । सपपातमहीपृष्ठे शस्त्रसंगसमाहत इति । रक्तबीजंकारणं यस्यसः रक्तबीजः । बीजंरेतसितत्त्वेच तावंकुरकारणे इतिविश्वः । शिव शिव इत्यानन्दे । शुम्भनिशुम्भतः असुरद्वयतः महाहवे महति संग्रामे तर्पिताः सन्तोषिताः भूताःदेवयोनिविशेषाः पिशाचाः मांसभक्षिणः तपस्तत्पतयो वैतालभैरवादयो ययासा तथा । त दुक्तमर्गलास्तोत्रे । शुम्भस्यैव निशुम्भस्य धूम्राक्षस्यच मर्दिनि । रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि इति १० ॥

हे अपने हुंकारमात्रमें धूम्रविलोचन औ उसके सैकड़ों सेनाके नाश करनेवाली समरमें सुत्र औ रक्तबीजसे पड़ाहुआ खून औ रक्तबीज शोषनेवाली जिसके महासंग्राम में भूत पिशाचपति तर्पितहुये, महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो १० ॥

अयिशतखण्डविखण्डितरुण्डवितुण्डितशुण्डगजाधिपते । रिपुगजगण्डविदारणचण्डपराक्रमशौण्डमगाधिपते । निजभुजदण्डविपाटितचण्डनिपाटितमुण्डभटाधिपते । जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनिशैलसुते ११ ॥

अयीति । हे शैलसुते त्वं जय जय इति सम्बन्धः । कोमला मन्त्रणे । सम्बोधनं विशिनष्टि । शतखण्डेन विखण्डितानि शक लीकृतानि रुण्डितानि कबन्धानि कोऽर्थः । शिरोरहितदेहानि येषां ते शतखण्डविखण्डितरुण्डाः एकभूतानां दैत्यानां वितु

ण्डितशुण्डाः कोऽर्थः मुखरहितशुण्डाकृताः गजाधिपतयो गज श्रेष्ठाः यया सातथा । स्यात्खण्डः शकलेक्षुविकारमणिदीर्धयो रितिविश्वः । कबन्धमुदके रुण्डे इति हेमचन्द्रः । तुण्डं मुख मितिस्मृतमिति वैजयन्ती । आजगाम गजारूढश्चामरस्त्रिद शार्दन इति दुर्गापाठे । अनेन गजयुद्धं सूचितं । कबन्धायुयुधु र्देव्या गृहीतपरमायुधा इतिदुर्गापाठे । अनेनरुण्डयुद्धंसूचितं । रिपवः शत्रुत्रय एव गजाःहस्तिनस्तेषां गण्डस्य कुम्भभागस्य विदारणे द्विधाकरणे यश्चण्डस्तीव्रः पराक्रमो विक्रमस्तेन शौण्डो विख्यातो मृगाधिपतिः सिंहो यस्यास्सा तथा । तदुक्तं दुर्गापाठे । सचसिंहोमहानादमुत्सृजन्धुतकेशरः । शरीरेभ्योऽसुरारीणाम सूनिवविचिन्वतीति । शौण्डो विख्यातमत्तयोरिति हेमचन्द्रः । निजः स्वकीयो योभुजदण्डो बाहुदण्डस्तेन विपाटितोखण्डी कृतश्चण्डो दैत्यस्तथा निपाटितो विदारितो मुण्डो दैत्यश्चेतौ भटाधिपती सेनापती यया तथा । तदुक्तं दुर्गापाठे । चण्डे च नि हते दैत्ये मुण्डेच विनिपातिते । बहुलेषु च सैन्येषु क्षयितेष्व सुरे श्वरइति । भटानां वीराणामधिपती भटाधिपती । शूरश्चाप भटो वीरो विक्रान्तः सुभटो भटीति हेमचन्द्रः इति ११ ॥

हे कबन्ध के सौखण्ड करनेवाली गजराजके खण्डकरनेवाली शत्रुकेगज के मस्तक छेदनेवाली सिंहवाहिनी अपने बाहुबलसे चण्ड औ मुण्डके नाशकरने-वाली, महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो ११ ॥

धनुरनुषंगरणक्षणसंगपरिस्फुरदंगनटत्कटके ।
कनकपिशंगपृषत्कनिषंगरसद्भटशृंगहतावटुके । कृ
तचतुरंगबलक्षितिरंगघटद्बहुरंगरटद्बटुके । जय
जयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १२ ॥

धनुरिति । हे शैलसुते त्वं जयजयेति सम्बन्धः । धनुषः कार्मु कस्य अनुषंगः संसर्गो यस्त्वेवं भूतो यः रणक्षणो युद्धसमयस्तस्य संगे प्रसंगे परिस्फुरंति किंचिच्चलन्ति यान्यंगानि गात्राणि तेषु



नटन्ति नृत्यन्ति कटकानि वलयानि यया सातथा । कटकंवलये सानाविति विश्वः । क्षणःकालविशेषःस्यात्पर्वण्यवसरेमहे इति हेमचन्द्रः । कनकेन सुवर्णेन पिशंगाः पीतवर्णाः पृषत्काः बाणाः यस्मिन्नेवंभूतो निषंगस्तूणो येषांताहृशाःरसन्तो गर्जन्तो येवटुको शृंगः श्रेष्ठः । शृंगं प्रभुत्वे शिखरेति विश्वः । वटुकाःकोऽर्थःदेवी गणाःतैःसगाः हताः सम्यक् हताः तद्बटुकाःशत्रुपुमानो ययासा तथा नवटुका इति अवटुकाः निषंगस्तूणसंगयोरिति हेमचन्द्रः । पृषत्कः शायकोशरिति हलायुधः । पिशंगः पिंगरः पीतीति वैजय न्ती । वटन्ति भक्षयन्ति बलिमिति वटुकाः । तदऽर्थं दर्शयति । कर्त्तव्यंच भवद्भिश्चस्वीयंकर्म सदाचये । शिवाभ्यां स्थापिता यस्मात्तस्माच्चे वटुकाःस्मृता इति शिवपुराणे । कृतं व्यूहरचनया स्थापितं यच्चतुरंगबलंचतुरंगिणी सेनाकोऽर्थः शत्रुकटकं तस्याछि दिः छेदनं तदर्थं रंगे रणभुविघटन्तः स्वायुधानि पातयन्तः बहु रंगाः नानाभिधा रटन्तो गर्जन्तो वटुकाःगणाः यस्याःसातथा । तदुक्तंदुर्गापाठे । आज्ञप्तास्तुततोदैत्याश्चण्डमुण्डपुरोगमाः । चतु रंगबलोपेता ययुरभ्युद्यतायुधाइति । घटयन्तीति घटन्तः । घटचे ष्टायां । रटयंतीति रटन्तः । रटपरिभाषणे । रंगःस्यान्नृत्ययुद्धयो रिति हेमचन्द्रः । छिदिःस्याच्छेदनेपिचेतिवैजयन्ती । चत्वारिग जाऽश्वरथपादातिरूपाणि अंगानि यस्य तत् चतुरंगं तथा । गजो वाजी रथोपत्तिः सेनांगःस्याच्चतुर्विधमिति हेमचन्द्रः । वाहनी पृतनासेना बलंसैन्यमनीकिनीति हेमचन्द्रः । तदुक्तंदुर्गापाठे । निश्वासान्मुमुचेयांश्च युध्यमानारणेम्बिका । तदेवसद्यःसम्भूता गणाःशतसहस्रशः । युयुधुस्तेपरशुभिर्भिन्दिपालासिपट्टिशैः । ना शयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः । अवादयन्तपटहान्गणाः शंखांस्तथापरे । मृदंगांश्चतथैवान्ये तस्मिन्युद्धमहोत्सवेइति १२॥

हे क्षणमात्र धनुषके अनुषंग युत चंचल अंगकटक में नाचते हुये औ स्वर्ण सापीत बाण औ तरकस गर्जते बड़े योधाको मारनेवाली चतुरंगिनी सेना बल सेना नष्ट हैं जिसके राणमें ऐसे बहुत आनन्द भैरव रटते हैं, महिषासुर-मर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो १२ ॥

**अयिरणदुर्मदशत्रुवधोद्धरदुर्द्धरनिर्जरशक्तिभृते। चतुरविचारधुरीणमहाशयदूतकृतप्रमथाधिपते । दुरितदुरीहदुराशयदुर्मतिदानवदूतदुरन्तगते। जय जयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १३॥**

अयीति। हे शैलसुते त्वं जयजय इति सम्बन्धः। सम्बोधनं विशिनष्टि। अयीति सम्बोधने। रणे संग्रामे दुर्मदाः उद्धताः ये शत्रवो रिपवः शुम्भादयो दैत्यास्तेषां वधे मारणे उद्धरे उद्धारकरणे दुर्द्धराः दुराधर्षाः याः निर्जरशक्तयः निर्जराणां ब्रह्मादीनां शक्तयो ब्रह्माद्याः विभूतयः ताभिर्भृता संभृता कोऽर्थः संयुक्ता यासातथा। तदुक्तंदुर्गापाठे। ब्रह्मेशगुहविष्णूनां तथेन्द्रस्यचशक्तयः। शरीरेभ्यो विनिष्क्रम्यतद्रूपैश्चण्डिकांययुरिति । तन्नामानि ब्रह्मपुराणे। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराहीच तथेन्द्राणी नारसिंहीति शक्तय इति। ऐश्वर्यपराक्रमदात्री या सा शक्तिः तदुक्तं ब्रह्मवैवर्तेप्रकृतिखण्डे। ऐश्वर्य्यवचनःशश्चक्तिःपराक्रमवाचकः तत्स्वरूपा तयोर्दात्रीया सा शक्तिःप्रकीर्त्तितेति निर्गता जरावार्द्धक्योयेषांतेनिर्जराः। निर्जरा निर्जरेसुरेइति हेमचन्द्रः। दुःखेन धर्त्तुमशक्योदुर्द्धरः। दुःखधार्य्येपिदुर्द्धरः इति वैजयन्ती। चतुरःप्रवीणः। विचारेसदसद्विवेचने धुरीणोधुरन्धरः महाशयः उदारचित्तः एवंभूतोदूतकृतः दूतःसन्देशहारकः कृतः सम्पादितः प्रमथाधिपतिः शिवोययासातथा। तदुक्तं दुर्गापाठे। साचाहधूम्रजटिलमीशानमपराजिता। दूतत्वंगच्छभगवन्पार्श्वेशुम्भनिशुम्भयोरिति। स्यात्सन्देशहरोदूत इत्यमरः। प्रमथानांपारषदानामधिपतिःस्वामीतिप्रमथाधिपतिः। प्रमथाःस्युःपारषदाइत्यमरः। दुरितेनपापेनदुः दुष्टाईहा वाञ्छायेषांते दुरितदुरीहा। स्यादीहाधमवाञ्छयोरिति हेमचन्द्रः। दुराशयेनदुष्टाभिप्रायेण दुष्टामति बुद्धिर्येषां तेदुराशयाः दुर्मतयः एवंभूताः येदानवाःशुम्भादयो दैत्याः तेषां दूतेन दूतभूतेन सुग्रीवनामासुरेण दुरन्ता दुःप्राप्या मतिश्चेष्टा यस्याः सा तथा। तदुक्तंदुर्गापाठे। निशम्येतिवचश्शुम्भः सतदाचण्डमुण्डयोः। प्रेषयामास सुग्रीवंदूतंदेव्यामहासुरमिति। छन्दोऽभिप्राय आशय इति यादवः। दुर्गतः अन्तः प्रान्तो यस्य तद्दुरन्तं। अन्तःप्रान्ते निश्चयेचेति वैजयन्ती॥



हे रणमें दुर्मद शत्रु के वधमें उद्यत दुराधर्ष अखण्ड ब्रह्मादिकी शक्ति युत प्रवीण ज्ञान में श्रेष्ठ प्रमथाधिपति के बड़ी आशय दूर करनेवाली जिन की अपराध भरीही ऐसी बुरी आशय कुबुद्धि दानवके दूतसें दुरन्त है महिषासुर मर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो १३॥

**अयि शरणागतवैरिवधूगणवीरवराभयदायिकरे। त्रिभुवनमस्तकशूलविरोधिशिरोधिकृतामलशूलकरे। दुरिदुमितामरदुन्दुभिनादमुहुर्मुखरीकृतदिङ्गिकरे। जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनिशैलसुते १४॥**

अयिशरणागतेति। हे शैलसुते त्वं जय जयेति सम्बन्धः। सम्बोधनं विशिनष्टि। अयीतिकोमलालापे। शरणंरक्षणमागतः प्राप्तोयो वैरिणांशत्रूणां वधूगणःस्त्रीगणश्चास्यवीराः पुत्रादयस्तेषां वराभयदायिनः अभीष्टभयराहित्यं दानशीलाः कराःहस्ताःयस्याः सा तथा। कराइत्यत्रबहुत्वंसहस्रभुजानामभिप्रायात्। तदुक्तंदुर्गापाठे। सददर्शततोदेवीं व्याप्तलोकत्रयांत्विषा। दिशोभुजसहस्रेण समन्ताद्व्याप्यसंस्थितामिति। वीरस्तुसुभटेश्रेष्ठे वीराःपुत्रादयस्स्मृता इतिशब्दार्णवः। तथाचश्रुतिः मानोवीरान् रुद्रभामिनो वधीर्हविष्मन्तइति। शरणं रक्षणे गृहे इति विश्वः। शरणागतत्यागेदोषः। तदुक्तंस्कन्दपुराणे। लोभाद्द्वेषाद्भयाद्वापियस्त्यजेच्छरणागतम्। ब्रह्महत्यासमन्तस्य पापंप्राहुर्मनीषिणइति। त्रिभुवन सुरनरनागलोकस्य मस्तकशूलाः शिरोरोगप्रायाःयेविरोधिनो

वैरिणस्तेषां शिरोधौ ग्रीवायांकृतं कृतपातं अमलं सूर्यवत्प्रका
शकं शूलं त्रिशूलं शिवदत्तमायुधंकरे पाणौ यस्याःसा तथा। तदुक्तं
दुर्गापाठे। ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलंपातुनो
भीतेर्भद्रकालिनमोस्तुतेति । शूलंशूलाद्विनिष्कृष्यददौतस्यैपि
नाकधृगिति। शूलंरुक्स्त्रियोर्योगे इति हेमचन्द्रः। शिरोधिःकन्ध
राग्रीवेति हलायुधः। दुरि दुमिताः पश्चात् कृताः ये अमराः दे
वास्तेषां दुन्दुभिनादैर्भेरीशब्दैर्मुहुर्मुखरीकृतः बहुकोलाहलितः दि
ङ्किरो दिशासमूहो यया सा तथा । दुरिदुम्पश्चाद्भागंइताः प्रा
प्ताइति दुरिदुमिताः । पश्चाद्भागेपि दुरिदुरिति वैजयन्ती। गण
समूहो निकरोनिवहो । विसरोव्रज इति हलायुधः। वृहद्वर्तुला
कारो दण्डैर्नादनयोग्यो दुन्दुभिः इति॥

हे वीरके स्त्रियोंको शरणमें आतही अपने करसे उनके पतियोंको अभय करने वाली, तीनों लोकके विरोधी मस्तक शूलके दूरकरनेको करमें त्रिशूल लेनेवाली, अपनेकरसे देवोंकी दुन्दुभी दुरिदुमि महाकोलाहल दशोदिशामें नाद करनेवाली, महिषासुर मर्दिनी सुंदरजूटवाली तेरी जयहो जयहो १४॥

**सुरललनाततथेयितथेयिकृताभिनयोदरनृत्यरते कृतकुकुथःकुकुथोंगतदादिकतालकुतूहलगानरते । धुधुकुटधुकुटधिन्धिमितध्वनिधीरमृदंगनिनादरते जयजयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १५॥**

सुरललनेति। हे शैलसुते त्वं जयजय इति सम्बन्धः। सम्बो
धनं विशिनष्टि । सुराणां देवानां ललनाभिर्मंजुघोषाप्रभृतिभिरा
भिः ततथेयि तथेयि शब्दयुक्ताभिः तथातथा तत्प्रकारेण कृतः
योऽभिक्षेपः अंगविक्षेपः सएवोदरेगर्भे तादृशंयन्नृत्यं नटनं तत्र
ते कृतानुरागे। तदुक्तंदुर्गापाठे । तुष्टुवुस्तांसुरादेवीं सहदिव्यैर्मह
र्षिभिः। जगुर्गन्धर्वपतयोननृतुश्चाप्सरोगणाइति। अभिनयस्त्वर्थ



मित्यन्यः। अंगहारोंगविक्षेपौ व्यंजकाभिनयौसमावित्यमरः। अ
भिनयश्चतुर्द्धा । तदुक्तं संगीतदर्पणे। आंगिकोवाचिकस्तद्वदैहि
कः सात्त्विकोऽपरः । चतुर्द्धाभिनयश्चेति विष्णोरग्रेचनाटके
इति । नृत्यलक्षणं संगीतदर्पणे । यतोहस्तस्ततोदृष्टिर्यतोदृष्टि
स्ततोमनः। यतोमनस्ततोभावो यतोभावस्ततोरसः। अंगेनाल
म्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत्। चक्षुर्भ्यां भावमित्याह पादाभ्यांता
लनिर्णयः। भानवीमानवीचान्या गजलीलातरंगिणी। हंसीमृगी
खंजरीटी गतयःसप्तचत्विमाः । लावोहंसोमयूरश्च हयःकुंजरए
वच। तित्तिरःकुक्कुटोमीनो गतयोलास्यहेतवइति । ललनाका
मिनीकान्ता वामाश्यामाचसुन्दरीति वैजयन्ती। कृताःवादिताः
कुकुथः कुकुथोंगइतितदादयोयेतालाः परिमठादयः करध्वनि
विशेषाःकुतूहलः कौतुकंचतद्युक्तंयद्गानंगायनंतत्ररते दत्तचित्ते ।
काललक्षणं संगीतार्णवे। हस्तद्वयस्यसंयोगे वियोगेवापिवर्त्तते।
व्याप्तिमान्योदशप्राणैः सकालस्तालसंज्ञकः। कालस्तालइतिप्रो
क्तः सावच्छिन्नोद्रुतादिभिः। गीतादिमानकर्त्तास्यात्सद्वेधाकथितो
बुधैः। तालःक्रीडाचमानंच सम्भवन्तियथासह। तथा तालस्य
सम्भूतिरितिज्ञेयंविचक्षणैरिति । तालः कालक्रियामानमित्य
मरः । कौतूहलंकौतुकंच कुतुकञ्चकुतूहलमित्यमरः। तालशब्दे
पि कुकुथ इतिहेमचन्द्रः। धुधुकुटइत्यादि यः शब्दःसजातो यत्र
तादृशो योध्वनिः शब्दः तद्वान्धीरो मन्दो यो मृदंगो मुरजःतस्य
निनादे शब्दे रता प्रीतियुता या सा तथा। धीरः पण्डितमन्दयो
रिति धरणी। मृदंगो घोषवाद्ययोरिति हेमचन्द्रः। निनादो निन
दो नदइतियादवः। तत्प्रमाणं हरिविलासकाव्ये। रुचिरकुचतटी
नां नाट्यकालेनटीनां प्रतिगृहमथ तत्र प्रत्यहंप्रादुरासन् । धि
सिकित धिमि धिद्धिद्धिधिद्धिद्धिधिद्धिधिमिधिमिधिमिगीतं
तत्तथेयीति शब्दाइति॥

हे सुरांगना अर्थात् देवस्त्रियों के तथेयि आदि भावयुत नृत्य में प्रीति करने वाली, कुकुथः २ के तालके कुतूहल औ सुन्दर गान में प्रीति करनेवाली धुधुः

आदि मृदंग के नादमें प्रीति करनेवाली महिषासुर मर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो १५ ॥

**जयजयजप्यजयेजयशब्दपरस्तुतितत्परविश्वनुते झणझणझिंझिमिझंकृतनूपुरसिंजित मोहित भूतपते । नटितनटार्द्धनटीनटनायकनाटकनाटितनाट्यरते जयजयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १६ ॥**

जयजयेति।हे शैलसुतेत्वंजयजयइतिसम्बन्धः।सम्बोधनंविशिनष्टि।जयजयशब्दोयास्मिन्ताहृशंजप्यंजपनीयंयेषांते जयजयजप्याः देवास्तेषां जयो विजयो यत्सकाशाद्विति जयजयजप्यजयातथा। तदुक्तंदुर्गापाठे।दुरात्मंस्तिष्ठतिष्ठेतिव्याजहाराम्बिकायदा।तदाजयेत्यभिहितंदेवैराकाशसंस्थितैरिति । जयशब्दपराजयशब्दोत्तराथा स्तुतिः स्तवनं तत्रतत्परं तदनुरक्तं यद्विश्वंविष्णुस्तेननुतेकृतस्तुते। तदुक्तं दुर्गापाठे। नज्ञायसे हरिहरादिभिरप्यपारेति ।प्रलयेविशन्ति जना यस्मिंस्तद्विश्वं। तथाचस्मृतिः। यतःसर्वाणि भूतानि भवन्त्यादियुगागमे । यस्मिंश्च प्रलयंयान्ति पुनरेवयुगक्षयइति । विष्णोर्विश्वमिति नाम चोक्तं विष्णुसहस्रनाम्नि विश्वं विष्णुर्वषट्कार इति। झण झणेति झिमि झंकृत शब्देन युतौ यौ नूपुरौ मंजीरौ तयोर्यत्सिंजितं शब्दस्तेन मोहितो भूतपतिर्महेश्वरो यया सा तथा । झंकरेकं तुलाकोटिर्नूपुरं तत्र झंकृतमिति धनंजयः ।मर्मरो वस्त्रपर्णादेर्भूषणानां तु सिंजितमिति हेमचन्द्रः। नटितं पूर्वं नर्त्तितं यन्नटार्द्धं शैलूषार्द्धं कोऽर्थः नटस्यार्द्धं नृत्यं तत्रावसरे अन्यायाः नट्यः नर्त्तक्यः नटनायकाः नटश्रेष्ठाश्च तै र्नाटकेन नाट्यप्रकारेण नाटितं यन्नाट्यं रचितं नर्त्तनं तत्ररते दत्तदृष्टे। शैलूषोभरतः सर्वः वेशी भरतपुत्रकः । नटः कृशाश्वी शैलाली चारणस्तुकुशीलव इति हेमचन्द्रः। स्यान्नाटकं प्रकरणं



भणः प्रहसनंडिमामिति हेमचन्द्रः। नर्त्तनं नटनं नृत्यं लास्यंनाट्यं च ताण्डवमिति हेमचन्द्रः। नटअवस्कन्दनेधातुः इति॥

जिसकी जय २ कीजाय औ इसी जय २ शब्द से विश्व स्तुतिकरते हैं झणादि नूपुरसे पैदाहुये शब्दपर भूतपति शिव मोहित हैं, नटी नटनायक के रीतिसे नाच में प्रीति करनेवाली हे महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो १६ ॥

**अयिसुमनस्सुमनस्सुमनस्सुमनस्सुमनोरमकान्तियुते श्रितरजनीरजनीरजनीरजनीरजनीकरवक्त्रवृते । सुनयनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराधिपते जयजयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते १७ ॥**

अयिसुमनेति। हे शैलसुते त्वं जयजय इति सम्बन्धः। सम्बोधनं विशिनष्टि। अयीति कोमलालापे। सुमनसोविद्वांसःसुमनसो महर्षयः सुमनसो देवास्तेषां सुमनसस्सुमनांसि मालत्याः पुष्पाणि तेभ्यो रमारमणीया या कान्तिः शोभातयायुते संयुक्ते। सुमनाःपुष्पमालत्योः स्त्रियांनादेवधीरयोरिति मेदिनीकारः। सुशोभनंमनोयेषां ते सुमनसः। कान्तिःशोभाभिलाषयोरिति विश्वप्रकाशः। श्रितःसेवितो रजनीरजो हरिद्रारेणुर्येनताहृशं नीरजं कमलं । नीरजनी कमलिनी रजनीकरश्चन्द्रः तद्वद्वक्त्रं मुखंतेनवृते शोभिते । रजनी नीलिकालाक्षा हरिद्रायामिनीषुचेति विश्वः। रजःशब्दःसांतोऽदन्तश्च। रजोयंरजसासार्द्धंस्त्रीपुष्पगुणधूलिष्वित्यजयः। वक्त्रमास्यंचवदनमितिहलायुधः। एतेनशुक्लत्वंदर्शितं सुनयनयोःशोभननेत्रयोर्विभ्रमं विलासं रातिदधातिसः सुनयनविभ्रमरः एताहृशोयः भ्रमरोललाटं तत्रागताः ये भ्रमराःकेशाः तेषुभ्रमराः भ्रान्तिधारकाः भ्रमराधिपतयो भृंगश्रेष्ठाः यस्याः सा तथा। रादानग्रहणयोः भ्रमरः कामुके भृंगे ललाट

टालकयोरितिविश्वप्रकाशः शोभायांसंशयेहावेविलासेविभ्रमोम
तइति वैजयन्ती । भ्रमरकेशयोःसाम्यं । तदुक्तंकाव्यादर्शे । के
शाभ्रमरसन्निभा इति ॥

हे पण्डित महर्षि देवादिके पुष्प औ-चमेलीके पुष्पकी माला पहिरनेवाली
हरदी के चूर्णसा पीतकमल औ कमलिनी और चन्द्रसा मुखवाली जिसके सु
न्दर नेत्रके विलास ललाट में पड़ते भ्रमर भ्रमते हैं, महिषासुरमर्दिनी सुन्दर
जूटवाली तेरी जयहो जयहो १७ ॥

महितमहाहवमल्लमतल्लिक वल्लितरल्लकभल्ल
रते विरचितवल्लिचपल्लितमल्लिकसल्लिकभिल्लिक
वर्गवृते । श्रितकृतफुल्लसमुल्लसितारुणतल्लजपल्ल
ववल्ललिते जयजयहेमहिषासुरमर्दिनिरम्यकपर्दि
निशैलसुते १८ ॥

महितेति । हे शैलसुते त्वं जयजय इति सम्बन्धः । विशेषणं
विशिनष्टि । महितःपूजितोयो महाहवमल्लोमहेश्वरस्तस्यमतल्लि
कार्थे शयनाय वल्लितो लिखितःकोऽर्थःसिन्दूररचनारचितोयो
ल्लकःसीमन्तः कोऽर्थःशिरः सिन्दूरसरणिस्तद्युक्तं यद्भल्लंभाल
तत्ररतेशक्ते । रतंक्रीडारतं शक्तमितिधरणी । भल्लंललाटमित्युक्तं
भल्लो भल्लूकबाणयोरिति वैजयन्ती । शिरःसिन्दूरसरणौरल्लकारल्
लका स्त्रियामितिशाश्वतः तत्रप्रमाणंहनुमन्नाटके । सीतारल्ल
कभल्लभग्नहृदयःस्वस्थोनलंकेश्वर इति । वल्लसंवरणेधातो
र्वल्लितइतिरूपं । क्लीवं मतल्लिकं तल्पे शस्तवाच्यपि चास्त्रि
यामिति संसारावर्त्तः । संग्रामोथ महाहव मिति धनंजयः । मल्लः
स्यात्सुभटे पात्रेइति धरणी । महपूजायामित्यस्यधातोर्महितइति
रूपं । विरचिता कंकतिकया निर्मलीकृता या वल्लिःकेशसंहति
तत्र चपल्लिता चपलीकृता बद्धा या मल्लिकसल्लिका मालती
माला सल्लिकानि सम्यक्सुन्दराणि वा तद्वन्तोये भिल्लिकाःभि



ल्लास्तेषांयोवर्गःसमूहस्तेनवृते परिवृते । मल्लिकोहंसभेदेस्यान्म
ल्लिकाकुसुमान्तरमितिहैमः ॥ सल्लिकापुष्पदामनीति केशवः ।
श्रितं भ्रमरसेवितं कृतफुल्लं सूर्य्यांशुभिः कृतविकाशं समुल्लसितं
मकरन्दशोभितं अरुणमारक्तं एतादृशं यत्तल्लजं कमलं तस्य
पल्लववत् मुखहस्तचरणानि यस्या सा तथा । ललितं सुन्दरे
त्रिष्विति शब्दार्णवः । पल्लवोऽस्त्रीकिशलयमित्यमरः जलाधारे
पितल्लंस्यादितिवैजयन्ती । फलंसामुद्रिके । पाणिपादतलौ रक्तौ
नेत्रान्तानि नखानिच । जिह्वा तालु धरोष्ठौच सप्तरक्तो धनी भवे
दिति ॥

हे पूजित जे महायुद्ध में मल्ल अर्थात् शिवके शयनार्थ मांगमें सेंदुरयुत भाल
में रतिकरनेवाली, चमेली से गुहे केशयुत चंचल भिल्लिनियों के समूह में
रति करनेवाली फूलेसे अरुण नालयुत कमल पदवाली, महिषासुरमर्दिनी
सुन्दर जूटवाली तेरी जयहो जयहो १८ ॥

अविरलगण्डगलन्मदमेदुरमत्तमतंगजराजगते
त्रिभुवनभूषणभूतकलानिधि रूपपयोनिधिराजसु
ते । अयिसुदतीजनलाल समान समोहनमन्मथ
राजमते जयजय हे महिषासुरमर्दिनि रम्यकपर्दि
निशैलसुते १९ ॥

अविरलेति । हे शैलसुते त्वं जय जय इतिसम्बन्धः । सम्बो
धनं विशिनष्टि । अविरलं अनल्पं यथास्यात्तथा गण्डयोःकपोल
योः गलत्स्रवत् योमदो मदोदकं तेन मेदुराः स्निग्धाः ये मत्त
मतंगजाः प्रमत्तहस्तिनस्तेषां राजा ऐरावतस्तद्वद्गतिः गमनं
यस्याः सा तथा । तदुक्तमलंकारशेखरे । गमनंहंसहस्तिवदिति ।
हर्षेरेतस्यहंकारे हस्तिदाने मदोमत इति वैजयन्ती । मेदुरः स्नि
ग्धचित्रयोरिति धरणी । गजो मतंगजो नागो हस्ती दन्ती द्विपः
करीतियादवः । त्रिभुवनभूषणभूतः त्रैलोक्याभरणरूपोयः कला

निधिरिन्दुस्तद्रूपा आनन्ददायिनी या भगवती सैव पयोनिधि राजः क्षीरसागरस्तस्य सुता कन्याताहृशे । मामृगांकःकलानिधि रिति हलायुधः । पयोजल निधीयते यस्मिन्स पयोनिधिस्तेषां राजेति पयोनिधि राजः अयीति कोमलालापे सुदतीनां सुन्दरीणां जनस्य समूहस्य लालसा वांछा तद्युक्तं यन्मानसंचित्तं तस्य मोहनः मोहन करो मन्मथराजः प्रद्युम्नः सएव सुतः पुत्रो यस्याः ताहृशे । शोभनादंताः यासांताः सुदत्यः पाददन्तनासिका मालेति सूत्रेण दन्त शब्दस्य दतृ आदेशः । आकांक्षा लालसा वाञ्छेति वैजयन्ती । चित्ते सरसिमानसमिति वैजयन्ती । मनश्चेतो मथ्नातीति मन्मथः तदुक्तं ब्रह्मवैवर्ते । मनो मथ्नाति सर्वेषां पंच बाणेन कामिनाम् । तन्नाम मन्मथन्तेन प्रवदन्ति मनीषिण इति ॥

हे कांचसा निरन्तर कपोलवाली मतेहुये ऐरावतसम चालवाली त्रिभुवनके भूषण भूत कलानिधि चंद्र औ लक्ष्मीसम रूपवाली स्त्रीजनके वाञ्छायुक्त मनमोहन मन्मथराज प्रद्युम्नसुतवाली, महिषासुरमर्दिनी सुन्दरजूटवाली तेरी जयहो जयहो १९ ॥

कमलदलामलकोमलकान्तिकलाकलितातु
लभालतले सकलविलासकलानिलयक्रमकेलिच
लत्कलहंसकुले । अलिकुलसंकुल कुन्तलमंडल
मौलि मिलद्बकुलालिकुले जयजय हे महिषासुर
मर्दिनिरम्यकपर्दिनिशैलसुते २० ॥

कमलेति । हे शैलसुते त्वं जय जय इति सम्बन्धः । सम्बोधनंविशिनष्टि । कंजलं अलति भूषयति यत् कमलं तस्यदलंपत्रं तद्वदमलानिर्मला कोमला मृदुला कान्तिःशोभा तस्याः कलाः भ्रूविक्षेपाद्यः ताभिराकुलितं व्याप्तं अतुलं विशालं भालतलं ललाटपट्टं यस्याः सा ताहृशे । कोमलं मृदुलं मृदु इत्यमरः । दलं पत्रंछदः पुमानित्यमरः । कान्तिःशोभाभिकाम्ययोरितिहेमचन्द्रः । भालं ललाटमहसोरिति । कला लीलाविलासयोरिति वैजयन्ती । सकलाःसमस्ताः ये विलासाः हावभावादिचेष्टास्तेषां कलाचातुर्यं तन्निलयेस्थानभूतेतथाक्रमकेलिःपादविक्षेपक्रीडातयाचलच्चलायमानंकलहंसकुलं हंसराजसमूहोयस्याःसाताहृशे । विलासोहावलीलयोरितिविश्वः । कलास्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके इतिविश्वः । क्रमश्चलनकम्पयोरितिविश्वः । कलहंसोराजहंसोकाद्म्बेनृपसत्तमे इति हेमचन्द्रः । कुलंस्यादन्वयेदेववृन्दे जनपदेपिचेति वैजयन्ती । हंसगत्याःसाम्यं । तदुक्तंकाव्यादर्शे।हंसवद्गमनंबाले तवनृत्यतिमेहृदीति । अलिकुलवत् भ्रमरसमूहवत् संकुलंघनीभूतं यत्कुन्तलमण्डलंकेशसमूहस्तद्वान्योमौलिर्मस्तकं तत्र मिलदृश्यं बकुलानां केशरवृक्षाणामलिकुलं भृंगसमूहोयस्यास्ताहृशे । षट्पदभ्रमरालय इत्यमरः । संकुलंवाच्यवत् व्याप्ते इतिविश्वः । कुन्तलःकेशवेशयोरिति वैजयन्ती । मण्डलंविश्ववृंदयोरितिवैजयंती मौलिर्मूर्द्धकिरीटयोरितिहेमचंद्रः । केशरोबकुलद्रुमइतिनिघंटः । अत्रपदेमिलितालंकारः । तदुक्तंकाव्यादर्शे।मिलितालंकृतस्तत्रयत्रभेदोनलक्ष्यतेइति।केशभ्रमरयोरेकीभावइति२०

हे कमलदलसमनिर्मल व कोमल कान्ति कलायुत सुन्दर भालवाली, सम्पूर्ण विलास की कलाका स्थानभूत राजहंस के सदृश क्रीड़ासंयुक्त गमनवाली, भ्रमरोंके समूहसम सघन मौलश्री के फूलों से गुथेहुये केशवेशवाली महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २० ॥

करमुरलीरववीजितकूजितलज्जितकोकिलमं
जुमते । मिलितमिलिन्दमनोहरगुंजितरंजितशैल
निकुंजगते । निजगणभूतवशाशबलांगणरिंगण
संभृतकेलितते । जयजयहेमहिषासुरमर्दिनिरम्यक
पर्दिनिशैलसुते २१ ॥

करमुरलीति । हे शैलसुते त्वं जयजय इति सम्बन्धः । सम्बोधनंविशिनष्टि । करे कृष्णहस्ते गता या मुरली वेणुस्तस्याः रवेण

स्वरेण वीजिताः निर्जिताः अतएव कूजिताः शब्दं कारिताः अतएव लज्जिताः कोकिलाः पिकाः येन तद्वन्मंजुः कोमलामतिर्बुद्धिर्यस्याः सा तादृशे । अनेनराधिकारूपत्वंदर्शितं मुरं संमोहनंलीयते लिष्टाभवतियस्याःसामुरली । “ मुरमोहने ” धातुः । कोकति वसन्तकाले मधुरध्वनिंकरोतीतिकोकिलः। कुकशब्दे वनप्रियःपरभृतः कोकिलःपिकःइत्यमरः । मिलिताःएकीभूताःयेमिलिन्दाः भ्रमरास्तेषां मनोहरं रम्यं यद्गुंजितंकूजितंतेनरंजितोऽनुरंजितो यःशैलःगोवर्द्धनाख्यगिरिस्तस्य निकुंजलतागृहं तत्रगताप्राप्तातादृशे । मिलन्तिपुष्पेषु संगतिंगच्छंतीति मिलिन्दाः । मिलसंगमे धातोः किन्दप्रत्ययः । मिलिन्दोमधुलिड्भृंगो मधुपोमधुलंपट इति वैजयन्ती । निकुंजकुंजौवाक्लीबे लतादिपिहितोदरेइत्यमरः। निजस्यस्वस्य गणभूताः सहायरूपाः वशाःयाःगोपांगनास्ताभिः शबलंचित्रितं यदंगणंकुंजप्राप्तंतत्रयाद्रिंगणं चलनंतेनसम्भृता प्रारब्धाकेलिततिः पुष्पावचयादिक्रीडापंक्तिर्यया सा तादृशे । वशा चकारिणीनार्य्योरिति विश्वः। चित्रं किर्मीरकल्माषशबलैताश्चकर्बुरइत्यमरः । वशासीमन्तिनीवामा वर्णिनीमहिलाबलेति हेमचन्द्रः । अंगनंप्रांगणोपाने इति हेमचन्द्रः। रिंगिगतौ रिंगणंचलनेपिचेति वैजयन्ती।ततिर्विस्तारपुंजयोरिति वैजयन्ती इति २१ ॥

हे मुरली औ कोकिल के शब्दों को जीतनेवाली, मंजुमतिवाली, भ्रमरों से कूजित औ रञ्जित, शोभित शैलों के कुञ्ज में गमन करनेवाली, अपने गणों से चित्रित आंगन में खेलने औ केलि करनेवाली, महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २१ ॥

**कटितटपीतदुकूलविचित्रमयूषतिरस्कृतचण्डरुचे । प्रणतसुरासुरमौलिमणिस्फुरदंशुरसन्नखचन्द्ररुचे । जितकनकाचलमौलिमदोर्जितनिर्जरकुंजरकुम्भकुचे । जयजयहेमहिषासुरमर्दिनिरम्यकपर्दिनिशैलसुते २२ ॥**



कटितटेति। हे शैलसुते त्वं जयजयइतिसम्बन्धः । सम्बोधनं विशिनष्टि । कटितटे कटिप्रदेशे यत्पीतदुकूलं पीताम्बरंतस्यविचित्रा अनेकविधाः ये मयूषाः किरणाः तैस्तिरस्कृतः धिकृतश्चंडरुचिः सूर्य्योययासातादृशे । किरणोस्रमयूषांशुगभस्तिघृणिरश्मयइत्यमरः । दुकूलंपट्टवसनमितिवैजयन्ती । हेलिश्चण्डरुचिः सूर्य्य इतिहलायुधः । प्रणताः नम्राः ये सुरासुराः देवदानवास्तेषां मौलिस्थमणिषुस्फुरंतः प्रतिबिम्बिताः ये अंशवःकिरणास्तादृशाः नखचन्द्रस्य चन्द्रवन्नखस्य लसन्तः शोभमानाः रुचयोदीप्तयोयस्याः सातादृशे। मौलिःकिरीटे धम्मिल्लेइतिविश्वः। नखःकरजखण्डयोरिति हेमचन्द्रः।स्पृहाभिष्वंगशोभासुद्युतौरुचिरुदीरितेतिवैजयन्ती। जितःविजितःकनकाचलस्यसुमेरोर्मौलिःशृंगंयैस्तादृशाः।मदेनगर्वेण ऊर्जिताःउत्साहयुक्ताःयेनिर्जरकुंजराःऐरावतादयो देवगजास्तेषां कुम्भाविव शिरोगतमांसपिण्डतुल्यौ कुचौ स्तनौ यस्याः सा तथा कुंजरो लुंपकः करीतिधनंजयः । अमरा निर्जरा देवा इत्यमरः । द्विपांगेराक्षसेराहौकुंभोवेश्यापतौ घटेइति वैजयंतीति २२ ॥

हे कमरके विचित्र पीताम्बर की ज्योति से सूर्यकिरणों के निरादर करनेवाली, जिस की नखचन्द्र देव औ दैत्योंकरके वन्दित, सुमेरु पर्वत के शृंग औ देवगज अर्थात् ऐरावत के शिरःपिण्ड अर्थात् कुम्भ के जीतनेवाले कुचवाली महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २२ ॥

**विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते । कृतसुरतारकशंकरतारकशंकरतारकसूनुसुते । सुरथसमाधिसमाधिसमाधिसमाधिसमाधिषु जातरते । जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते २३ ॥**

विजितेति । हे शैलसुते त्वं जयजयइतिसम्बन्धः । सम्बोधनं

विशिनष्टि । सहस्रसंख्याकाः कराः हस्ताः यस्यसः सहस्रकरःसहस्रार्जुनः। तदुक्तं नर्मदामाहात्म्ये । सहस्रभुजवाञ्जातः कृतवीर्य्यात्मजस्तदा । भुजाःसहस्रंयस्यासन्ससहस्रभुजःस्मृतइति । विजितःविशेषेणजितः वशीकृतः सहस्रकरःसहस्रबाहुर्येनसः विजितसहस्रकरः परशुरामः । तदुक्तंहनुमन्नाटके । सहस्रबाहुस्त्वमहंद्विबाहुस्त्वंसैन्ययुक्तोप्यहमेकएवं। त्वंचक्रवर्त्तीमुनिनन्दनोऽहंतथापिनौपश्यतुतर्कमर्कइति ।एकसहस्रसंख्याकानि शिरांसि रातिधारयतियःसःएकसहस्रकरः शेषाख्यःसर्प्पराजः । रादाने । कंसुखेशीर्षेवारिणोरिति हेमचन्द्रः।तदुक्तं मूर्द्धासहस्रंश्रेष्ठंतत्तवनागकुलेष्वपि। अतःसहस्रमूर्द्धाते नामलोकेभविष्यतीति। एकसहस्रकराःकिरणाःयस्यसः एकसहस्रकरःसूर्य्यः।तदुक्तंभविष्ये । सूर्य्योगोभिर्जगत्सर्वमादीपयतिसर्वशः । त्रीणिरश्मिशतान्यस्यभूर्लोकंद्योतयंतिवै । त्रीणि त्रीणि तथा चान्यौ द्यौर्लोकं भासयन्तिच । शतंचापि अधस्तात्तुपातालंतापयन्त्युतेति । सहस्रमित्येके । विंशत्याद्याःसदैकत्वे संख्यासंख्येययोरपीति हेमचन्द्रः । ससूर्यःएकोमुख्योयेषान्तैर्नुतेस्तुते । एकेमुख्यान्यकेवलाइत्यमरः। कृतेनउपकारेण सुरानिन्द्रादिदेवान् तारयति आपद्भ्यो निष्काशयतीतिकृतसुरतारकः श्रीरामचन्द्रस्तस्यशंकरं कल्याणकरंचतारकं षडक्षरात्मकमन्त्रस्तेन मन्त्रेणशंकरोमहेश्वरस्तारकः जीवोद्धारकारस्तस्यशंकरस्यसूनुःपुत्रः स्कन्दःसएवसुतः पुत्रोयस्याःसातादृशे। तदुक्तमगस्त्यसंहितायां । मुमूर्षोर्दक्षिणकर्णे यस्यकस्यापिवास्वयम् । उपदेक्ष्यसिमन्मन्त्रं समुक्तोभविताशिवेति । शंकल्याणे सुखेपिचेति विश्वः । कृतंपुण्योपकारयोरितिवैजयन्ती । संसारसागरात्तारयतियत्ततारकं मुक्तिप्रदमित्यर्थः । सुरथस्तन्नामानृपः । समाधिस्तन्नामावैश्यःतयोःसमाधिध्यानंपुनःसमाधिर्धर्मचिन्ता। पुनस्समाधिर्नियमाचारः । पुनस्समाधिःसमर्थनंतपोजन्यकायक्लेशसहनं तेषुसमाधिषुजाता उत्पन्नारतिः प्रीतिर्यस्याः सातादृशे । समाधिर्नियमेध्याने नीवाकेचसमर्थने इतिविश्वः । समाधि



र्नाधर्मचिन्तेत्यमरः । तदुक्तं दुर्गापाठे । तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्त्तिम्महीमयीम् । अर्हणांचक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैरिति । तौ सुरथोवैश्यश्च इति २३ ॥

हे सहस्रार्जुन के जीतनेवाले परशुराम औ सूर्य्य औ शेषकरके वन्दित कल्याण करनेवाले श्रीरामचन्द्र के तारकमन्त्र के अधिष्ठाता महादेव के पुत्र स्कन्द की माता राजासुरथ औ समाधिनाम वैश्य के ध्यान धर्मचिन्ता नियमाचार जप तपमें प्रीति करनेवाली, महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २३ ॥

**पदकमलंकमलानिलये वरिवस्यतियोऽनुदिनंसशिवे । अयिकमलेकमलानिलये कमलानिलयस्सकथन्नभवे । तवपदमेवपरम्पदमस्त्वनुशीलयतोममकिन्नशिवे । जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनिशैलसुते २४ ॥**

पदकमलमिति । हे शैलसुते त्वं जयजयेतिसम्बन्धः । सम्बोधनंविशिनष्टि । हेकमलानिलये हेसशिवे । यःपुरुषःतवभवत्याःपदकमलंचरणारविन्दं अनुदिनंदिनंप्रति वरिवस्यति धूपदीपादिभिःपूजयतिसःपुरुषः कमलानिलयः कमलायाःलक्ष्म्याःनिलयोनिवासःकथं न अस्तु न भवेत् भवत्येवइत्यन्वयः।केजलेमलते शोभतइतिकमलं तदेवनिलयंगृहंयस्याः सा कमलानिलयातादृशे। निकायनिलयालयमितिहलायुधः । शिवंकल्याणं तेनसहितासशिवातादृशे। स्वःश्रेयसंशिवम्भद्रमित्यमरः। वरिवस्यासपर्य्यायामितिवैजयन्ती । सपर्य्यापूजा । अयिकोमलालापे । हेकमले । हेकमलालये । हेशिवे।एवनिश्चयेनसंभवेलोके तवपदंपादारविंदं अनुशीलयतो ध्यायतोममस्तुतिकर्त्तुर्देहावसाने पदंपदंमोक्षपदं किन्नभवेत् भवत्येव। कंयमराजंअलतिवारयतीतिकमलातादृशे। अलमितिवारणे । कोयमेब्रह्मसूर्ययोरितिवैजयन्ती । कमलायाः शोभायाः निलया स्थानभूता या सा कमलानिलयातादृशे। शिवा

सुखस्वरूपातादृशे । सतीशिवामहादेवी शर्वाणीसर्वमंगला।भवानीकृष्णामैनाकस्वसासेनाद्रिजेश्वराइति हेमचन्द्रःइति २४ ॥

हे शिवे हे करुणालये हे कमले हे कमलानिलये जे तेरे चरणारविन्दोंको पूजतेहैं ते क्या कमलालय अर्थात् वैकुण्ठमें नहीं जाएँगे अवश्यजाएँगे हेशिवे तेरे चरणोंको ध्यान करनेवाला मैं क्या परमपदको प्राप्त न होऊंगा अवश्य होऊंगा महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २४ ॥

**कनकलसत्कलशीकजलैरनुसिंचति तेंगनरंगभुवं । भजतिसकिन्नशचीकुचकुम्भतटीपरिरम्भसुखानुभवं । तवचरणंशरणंकरवाणिनतामरवाणिभवानिशिवं । जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनिशैलसुते २५ ॥**

कनकेति । हे शैलसुते त्वं जय जय इतिसम्बन्धः । सम्बोधनं विशिनष्टि।कनकस्यस्वर्णस्य लसन्तः शोभमानाःये कलशीकाः कलशाः कुम्भाःतेषु यानिजलानि तैः हे भगवति ते तव अंगनरंगभुवं अंगनेप्रांगणे या रंगभूः नाट्यस्थानं तां यः पुमाननुसिञ्चति सेचयति सःशच्याः इन्द्राण्याः कुचकुम्भयोः स्तनकलशयोः या तटीप्रान्तप्रदेशस्तत्परिरम्भस्य आलिंगनस्य सुखानुभवं आनन्दानुभोगं किन्नभजति अपितुभजत्येव । शचीन्द्राणीशतावर्य्यौरितिहेमचन्द्रः । स्थानंनाट्यस्यरंगः स्यादितिहेमचन्द्रः । कलशानामेव कलशीकाः कलशी कलशः कुम्भइति वैजयन्ती। अतएव हे नतामरवाणि!हेभवानि! शिवंकल्याणरूपं तेतवचरणं चरणारविन्दंशरणं रक्षितारं अहं करवाणि करोमिइत्यन्वयः । शरणं गृहरक्षित्रोरित्यमरः । नता अधःकृता अमराणां देवानां वाणी सरस्वतीयस्याः स्तुतौसातादृशे । गीर्वाग्वाणी सरस्वतीत्यमरः। गीर्वाणामरुतोऽस्वप्ना अमरा दानवारय इतिहेमचन्द्रः । भवस्य शिवस्येयं शक्तिरिति भवानी भवनीललोहिताविति हेमचन्द्रः । शिवंनिःश्रेयसंश्रेयो निर्वाणं ब्रह्मनिर्वृतिरिति हेमचन्द्रःइति २५॥



हे भगवती सोने के कलशों के बुंदों से सिंचहुये आंगन नृत्यस्थानको जो भजते हैं ते शची के कुम्भस्तनके स्पर्श का सुख न पावैंगे अर्थात् इंद्र न होवैंगे अवश्य होवैंगे तेरे वे चरण मेरी रक्षाकरेंहींगे जिससे सरस्वती नम्र है महिषासुरमर्दिनी सुंदरजूटवाली तेरी जयहो जयहो २५ ॥

**तवविमलेन्दुकलंवदनेन्दुकलंकलयन्ननुकूलयते । किमुपुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते । ममतुमतंशिवमानधनं भवतीकृपयाकिमुनक्रियते । जयजयहेमहिषासुरमर्दिनि रम्यकपर्दिनिशैलसुते २६ ॥**

तवेति । हे शैलसुते त्वं जयजय इतिसम्बन्धः । सम्बोधनं विशिनष्टि । हे भगवति यः पुरुषः तव भवत्याः वदनेन्दुकलं इन्दुकलावन्मुखारविन्दं कलयन् स्वीकुर्वन् अनुकूलयते ध्यानपरो भवति असौसःपुमान् किमुसम्भावनायां पुरुहूतस्यइन्द्रस्य पुरिस्वर्गेयाः इन्दुमुख्यः चन्द्रवदनाः सुमुख्यः कामिन्यः अप्सरस इत्यर्थः ताभिः विमुखीक्रियते पराभूयते किं न विमुखीक्रियते इत्यर्थः। इन्द्रोहरिर्दुश्च्यवनोऽच्युताग्रजो वज्रीविडौजामघवान्पुरन्दरः । प्राचीनबर्हिः पुरुहूतवासवो संक्रंदनाखण्डलमेघवाहनः इतिहेमचन्द्रः । कीदृशं वदनेन्दुकलं । विमलेन्दुकलं । विमला निर्मला इन्दुकला चन्द्रकला यस्मिन् तत् । इन्दुकला क्षीरसागरेण दत्ता। तदुक्तं दुर्गापाठे । क्षीरोदश्चामलंहारमजरेचतथाम्बरे । अर्द्धचन्द्रं तथाशुभ्रंकेयूरान्सर्वबाहुष्विति । शिवमानधनं शिवस्य महेश्वरस्य मानमर्चनं तदेवधनं सर्वस्वंतादृशं ममयतं मदीयभावं भवती कृपया त्वदीयकरुणया किमुकथंनक्रियते क्रियतएव । छन्दोभिप्रायः अकूतंमतभावाशया अपीति हेमचन्द्रः । शिवोऽस्थिधन्वा पुरुषास्थिमालीति हेमचन्द्रः इति २६ ॥

हे भगवती मैं निश्चयसे कहताहूं कि तेरे इंदुसम विमलमुखके सेवनसे क्या तू कृपा न करैगी अवश्यकरैगी हे माता शिवमानधनी अपनीप्रभासे इन्द्रपुरीकी इंदु-

मुखी अर्थात् इंद्राणी को लजानेवाली क्या तू कृपासे अनुग्रह नहीं करैगी महिषासुरमर्दिनी सुन्दर जूटवाली तेरी जयहो जयहो २६ ॥

अयिमयिदीनदयालुतयाकृपयैवतथाभवितव्य मुमे । अयि जगतोजननीकृपयातियथासितथानु मितासिरमे । यदुचितमत्रभवत्युररीकुरुतादुरुता पमपाकुरुमे । जयजयहेमहिषासुरमर्दिनिरम्यकप र्दिनिशैलसुते २७ ॥

अयीति । हे शैलसुते त्वं जयजय इतिसम्बन्धः । सम्बोधनं विशिनष्टि । अयिइति कोमलालापे । हे उमे हे भगवति मयि मद्वि षये या कृपा करुणा तयापुनः दीनदयालुतया दीनेषु विपत्पीडि तेषु या दयालुता दयाबाहुल्यं तया तथा भवितव्यं भावनीयं य थास्यात्तथात्वं मयानुमितासि ज्ञातासि तथा कथं यथा जननी माता जगतः लोकस्य अतिकृपया बहुकरुणया भूयते जायतइ त्यर्थः । उः शिवस्तस्यमालक्ष्मीः इत्युमा । उकारस्तु महेश्वर इत्येकाक्षरः । माचलक्ष्मीः प्रकीर्त्तिता इत्येकाक्षरः । अयिकोम लालापे हे रमे हे लक्ष्मि अत्रावसरे यदुचितं योग्यं भवतितत्त्वं उररीकुरुतात् अंगीकारंकुरु । कुरुतादिति हौपररूपं । उररीत्यव्य यमंगीकारे । उचितं विदितेऽभ्यस्ते मितेयुक्ते यथोचितमिति हेम चन्द्रः । मे मम उरुतापं महत्तापत्रयं त्वं अपाकुरु दूरतरं वयइ त्यर्थः । अत्रस्तोत्रे पुष्पांजलिनामेदंछन्दः । तदुक्तं पिंगलप्रदीपे । यस्यादौ नगणस्त्वेकः षडेव रगणास्ततः । अन्तेलघुगुरूयस्यसच पुष्पांजलिःस्मृत इति २७ ॥

हे मातः हे उमे जो तेरी दयालुता औ कृपालुता सच है तो मुझे प्रकटहो हे रमे हे जगज्जननी तू मुझ करके पूजित हुई यहां जो मुझे उचित हो सो अंगीकार कर और हे मातः मेरे सन्तापको दूरकर महिषासुरमर्दिनी सुंदरजूटवाली तेरी जयहो जयहो २७ ॥



स्तुतिमितस्स्तिमितःसुसमाधिना नियमतोय मतोऽनुदिनंपठेत् । परमयारमयासनिषेव्यतेपरि जनोऽरिजनोपिचतम्भजेत् २८ ॥

अथस्तुतिफलमाह । स्तुतिमितइति । यःपुमान् स्तुतिं स्तोत्रं इतः अधिगतःसुसमाधिना ध्यानेन स्तिमितः निश्चलःसन्नियमतः कालादेः प्रमाणात् । यमतः अन्तरेन्द्रियनिग्रहात् । अनुदिनमन्वहं पठेत् पाठं कुर्यात् सः नरः परमया उत्कृष्टया रमया लक्ष्म्या निषेव्यते नितरामतिशयेन सेव्यत इत्यर्थः । षिवुसेवायां धातुः । स्तिमितः क्लिन्ननिश्चलाविति हेमचन्द्रः । ध्यानन्तु विषयेतस्मिन्नेकप्रत्ययसंततिः । समाधिस्तु तदेवार्थः मात्रभाषणरूपकमिति हेमचन्द्रः । नियमः शौचसन्तोषस्वाध्यायतपसामपीति हेमचन्द्रः । अहिंसासूनृताऽस्तेयब्रह्माकिञ्चनतायमा इति हेमचन्द्रः । पुनःअरिजनः शत्रुजनः परिजनः स्वजनोभूत्वातंनरं भजेत् सेवेत परिवारः परिजन इति वैजयन्ती इति २८ ॥

उस भगवतीको मैं भजताहूं जिसकी इसस्तुतिको ध्यानसहित संयमनियमसे नित्यपढ़नेवालोंको परमा अर्थात् लक्ष्मी सेवनकरती है अर्थात् धनवान् होजाता है, वैरीभी वैरछोड़कर जनसहित सेवन करते हैं २८ ॥

रमयतिकिलकर्षत्येषचित्रंनराणामवरजइवत स्मादाद्रामकृष्णःकवीनाम् । अकृतसुकृतरम्यंरम्य पद्यैकहर्म्यं स्तवनमवनहेतुःप्रीतयेविश्वमातुः२९ ॥

रमयतीति । सः रामकृष्णः पण्डितः विश्वमातुः जनन्याः भगवत्याः प्रीतये प्रसन्नाय स्तवनं स्तोत्रं अकृत कृतवानित्यर्थः । कीदृशं स्तवनं सुकृतरम्यं । सुकृतानांरम्यं रमणीयं । पुनः कीदृशं रम्यपद्यैकहर्म्यं । रम्याणि अतिप्रियाणि पद्यानि श्लोकाःयेषान्ते रम्यपद्याःकवयःतेषां एकहर्म्यं मुख्यविश्रामस्थानं । हर्म्यंच धनिनां वासइति वैजयन्ती । कीदृशः सः अवनहेतुः अवनं रक्षणं तदेवहेतुः कारणं यस्य तादृशः । अवनं रक्षणप्रीताविति विश्वः ।

सः कः यः एषः रामकृष्णाख्यकविः तस्मात्कृतस्तोत्राद्धेतोः कवीनां पण्डितानां नराणां मनुष्याणां कोर्थः अनधीतशास्त्राणामपिचित्तंमनः रमयति सानन्दंकरोति तथाकर्षति अन्यत्रगतचित्तमाकर्षतीत्यर्थः। कइव। अवरजइव कनिष्ठ पुत्रइव किलेति प्रसिद्धः। अवरस्मात्पश्चाज्जायत इत्यवरजः इति २९॥

यह स्तोत्र सुकृतपुरुषोंके रमणलायक रमणीयस्थान औ भगवतीके प्रसन्न होनेकेवास्ते रामकृष्ण कविने बनाया २९॥

शरदिन्दुरम्योबहुविन्दुगम्यो मुहुर्वैद्यहृद्योयतः साधुवन्द्यः। ततःश्रीपतेःसूनुनाकारिसत्सूनुनापद्यपुष्पांजलिर्विश्वमातुः ३०॥

शरदिति। ततस्तस्मात् कारणात् श्रीपतेः श्रीपतिनामाचार्य्यस्य सूनुना पुत्रेण विषमपदजातिः रामकृष्णाख्यपण्डितेन। विश्वमातुर्भगवत्याःपद्यपुष्पांजलिस्तन्नाम स्तोत्रं अकारि कृतम् कीदृशेन सूनुना सत्सूनुना सतां सज्जनानां मध्ये सूनुः सूर्यइव प्रकाशकत्वात्। सूनुः पुत्रेऽनुजेरवाविति विश्वः। तत् कुतः यतः अयं पद्यपुष्पांजलिः साधुवन्द्यः साधुभिर्मुनिभिर्वन्द्यः वन्दनयोग्यः। साधुर्जिने मनौवार्द्धुषिके सज्जनरम्ययोरिति हेमचन्द्रः। पद्यपुष्पांजलिं विशिनष्टि। शरदिन्दुः शरत्कालीनचन्द्रः तद्वत् रम्यः सुन्दरः। बहुभिर्विन्दुभिः पण्डितैर्गम्यः ज्ञातव्यः। वेदिता विदुरो विन्दुरितिहेमचन्द्रः। मुहुरतिशयेन वन्दनीयस्य हृद्यः प्रियः वन्दितुंयोग्यः वन्द्यः ३०॥

इति श्रीश्रीपतितनूजरामकृष्णकविकृतभगवतीपद्यपुष्पाञ्जलिःसमाप्तः शुभमस्तु॥

शरच्चन्द्रवत् रमणीय बहुत पण्डितोंको अगम्य बारबार ज्ञानियोंको प्रिय साधुकरके वन्दित भगवतीके प्रसन्नताकेवास्ते श्रीपतिके पुत्र पण्डितोंमें सूर्य रामकृष्ण कविने इसको बनाया ३०॥

षष्ठ्यामाषाढकृष्णस्यअष्टवेदांकभूमिते। प्रेमचन्द्रकृताभाषा जानकीनाथहेतवे ३१॥

इति॥